"न भवद्भ्यामहं शोच्यो नायं राजापराध्यति।
भवितव्यमनेनैव येनाहं निधनं गतः ॥"

भवितव्यता, स्त्री, (भवितव्य+भावे तल्।) भाग्यम्। इति जटाधरः॥ (यथा, कथासरित्सागरे। २७। ८६।
"तन्ममाचक्ष्व तावत् त्वं कथयिष्याम्यहञ्च ते।
यदस्तु कोऽन्यथा कर्त्तुं शक्तो हि भवितव्यताम् ॥")

भविता, [ऋ] त्रि, (भू+शीलार्थे तृच्।) भवनशीलः। इति भरतः॥ साधु भवनशीलः। इति मुकुटः। तत्पर्य्यायः। भूष्णुः २ भविष्णुः ३। इत्यमरः॥ (भविष्यदर्थेऽपि तृच्प्रत्ययः स्यात् यथा, मार्कण्डेये। २४। २६।
"नाम्ना भार्य्या भवित्रीति वर्ण्णयित्वा मदालसाम्।")

भविनः, पुं, (भवाय काव्यादिप्रकाशाय इनः सूर्य्यः इव। ततः पृषोदरादित्वात् साधुः।) काव्यकर्त्ता। इति त्रिकाण्डशेषः॥

भविलः, पुं. (भू+"सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्।" उणा०। १। ५५। इलच्।) षिड्गः। इति त्रिकाण्डशेषः। भव्यः। इति सिद्धान्तकौमुद्यामुणादिपादः॥

भविष्णुः, त्रि, (भू+"भुवश्च।" ३।२।१३८। इति इष्णुच्। भवतेर्धातोश्छन्दसि विषये तच्छीलादिषु इष्णुच् प्रत्ययो भवतीति काशिका।) भविता। इत्यमरः॥

भविष्यः, त्रि, (भू+लृटः सदिति शतृस्यट् च ततो विभाषायां पृषोदरात् तस्य लोपः।) भविष्यत्कालः। इति हेमचन्द्रः॥ (यथा, हरिवंशे। ८१। २८।
"अयं भविष्ये कथितो भविष्यकुशलैर्द्दिजैः॥")
पुराणविशेषे, क्ली। यथा,—
"चतुर्द्दशं भविष्यं स्यात्तथा पञ्चशतानि च॥"
इति श्रीभागवते १२ स्कन्धे १३ अः॥
(फलविशेषे, क्ली॥)

भविष्यत्, त्रि, (भू+लृटः शतृस्यट् च।) कालविशेषः। तस्य लक्षणम्॥ वर्त्तमानप्रागभावप्रतियोगित्वम्। इति सारमञ्जरी॥ वर्त्तमानकालोत्तरकालीनोत्पत्तिकत्वम्। इति शिरोमणिकृतपदार्थटीकाखण्डनम्॥ तत्पर्य्यायः। अनागतम् २ श्वस्तनम् ३ प्रगेतनम् ४ वर्त्स्यत् ५ वर्त्तिष्यमाणम् ६ आगामि ७ भावि ८। इति राजनिर्घण्टः॥ अद्यतने भव्ये ण्टौ दूरभव्ये तौ। इति सांप्रदायिकः। यथा श्वो भविता वर्षान्तरे भविष्यति। इति दुर्गादासः॥

भव्यं, क्ली, (भवतीति भूयते इति वा। भू+"भव्य गेयेति।" ३। ३। ६८। इति यत्। भव्यादयः शब्दाः कर्त्तरि वा निपात्यन्ते। इति काशिका।) फलविशेषः। चालता इति भाषा। तत्पर्य्यायः। भवम् २ भविष्यम् ३ भावनम् ४ वक्त्रशोधनम् ५ लोमफलम् ६ पिच्छिलबीजम् ७। अस्य गुणाः। अम्लत्वम्। कटुत्वम्। उष्णत्वञ्च। बालस्य तस्य गुणः। वातकफापहत्वम्। पक्वस्य तस्य गुणः। मधुराम्लत्वम्। रुचिकारित्वम्। श्रमशूलहरत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"भव्यं स्वादु कषायाम्लं हृद्यमास्यविशोधनम्।
तदेव पक्वं दोषघ्नं गुरु ग्राहि विषापहम्॥"
इति राजवल्लभः॥
अस्थि। इति मेदिनी। ये, ४३॥

भव्यं, त्रि, (भवतीति। भू+कर्त्तरि निपातनात् वा यत्।) शुभम्। (यथा, भागवते। ४। १४। ३०।
"भव्यायां भव्ययाच्ञायां तस्मै विदुर! चुक्रुधुः॥")
सत्यम्। योग्यम्। भावि। इति मेदिनी शब्दरत्नावली च॥ (यथा, मार्कण्डेये। ७६। ७।
"भूतभव्यभवन्नाथाः शृणु चैतत् त्रयं द्विज!॥"
श्रेष्ठम्। यथा, भागवते। १। १५। १७।
"यत्पादपद्मभवाय भजन्ति भव्याः॥"
"भव्याः श्रेष्ठाः।" इति तट्टीकायां स्वामी॥
प्रसन्नम्। यथा, रामायणे। १। ६२। ७।
"स मे नाथो ह्यनाथस्य भव भव्येन चेतसा।"
भव्येन प्रसन्नेन चेतसेति तट्टीकायां रामानुजः॥)

भव्यः, पुं, (भवति उत्पद्यते भू+निपातनात् कर्त्तरि वा यत्।) कर्म्मरङ्गवृक्षः। इति मेदिनी। ये, ४२॥ रसभेदे, पुं क्ली। इति शब्दरत्नावली॥

भव्या, स्त्री, (भव्य+टाप्।) उमा। गजपिप्पली। इति मेदिनी। ये, ४२॥

भष, वुक्कि। पिशुनोक्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-श्वशब्दे अक० पिशुनोक्त्यादौ सक०-सेट्।) वुक्कः कुक्कुरादिकर्त्तृकशब्दः। भषति श्वा। भषत्यन्यदोषं खलः सूचयतीत्यर्थः। भर्त्सने इति प्राञ्चः। भषति श्वा पान्थं शब्देन निर्भर्त्सयतीत्यर्थः। इति रमानाथः। इति दुर्गादासः॥

भषः, पुं, (भषतीति। भष कुक्कुरादि शब्दे+अच्।) कुक्कुरः। इति रत्नमाला॥

भषकः, पुं, स्त्री, (भषतीति। भष+"कुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि।" उणा० २। ३२। इति कुन्।) कुक्कुरः। इत्यमरः। २। १०। २२॥

भषणं, क्ली, (भष्+ल्युट्।) वुक्कनम्। कुक्कुरशब्दः। इति हेमचन्द्रः॥

भषा, स्त्री, स्वर्णक्षीरी। इति रत्नमाला॥

भषी, स्त्री, (भष+स्त्रियां जातित्वात् ङीष्।) शुनी। इति शब्दरत्नावली॥

भस, र लि दीप्तौ। भर्त्सने। इति कविकल्पद्रुमः॥ (ह्वा०-पर०-अक०-सक० च सेट्।) र वैदिकः। लि, बभस्ति। इति दुर्गादासः॥

भसत्, स्त्री, (बभस्तीति। भस्+"शृदृभसोऽदिः।" उणा० १। १२९। इति अदिः।) काष्ठम्। अन्धमांसम्। जघनम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

भसत्, [द्] स्त्री, (भस+अदिः।) भास्करः। योनिः। इति मेदिनी॥ मांसम्। कारण्डवपक्षौ। प्लवः। इत्युणादिकोषः॥ कालः। इति त्रिकाण्डशेषः॥

भसनः, पुं, (बभस्तीति। भस्+ल्युः।) भ्रमरः। इति भूरिप्रयोगः॥

भसन्तः, पुं, (बभस्तीति। भस+बाहुलकात् झच्।) कालः। इति त्रिकाण्डशेषः॥

भसितं, क्ली, (भस्+क्त।) भस्म। इति हेमचन्द्रः॥ (यथा, शिवपुराणे वायुसंहितायाम्। २६। ४१।
"चन्दनं वामदेवाख्ये हरितालञ्च पौरुषे।
ईशाने भसितं केचिदालेपनमितीदृशम्॥")

भसूचकः, पुं, (भानां नक्षत्राणां सूचकः।) दैवज्ञः। इति शब्दरत्नावली॥

भस्त्रका, स्त्री, (भस्यते इति। भस दीप्तौ+ष्ट्रन्+टाप्। भस्त्रा ततः स्वार्थे कन्। "भस्त्रैषाजाज्ञेति।" ७।३।४७। इति इत्वं न। आतः स्थाने योऽकारस्तस्य इत्वं न भवति उदीचामाचार्य्याणां मतेन। इति काशिका।) चर्म्मप्रसेविका। इति शब्दरत्नावली॥

भस्त्रा, स्त्री, (भस्यतेऽनयेति। भस+"हुयमाश्रूभसिभ्यस्त्रन्।" उणा० ४। १६७। इति त्रन् अजादित्वात् टाप्।) अग्निदीपकचर्म्मनिर्म्मितयन्त्रविशेषः। भाथी इति याँता इति च भाषा। तत्पर्य्यायः। चर्म्मप्रसेविका २। इत्यमरः।२।१०।३३॥ चर्म्मप्रसेवकः३। इति भरतः॥ भस्त्राका ४ भस्त्रका ५ भस्त्री ६। इति शब्दरत्नावली॥ भस्त्रिका ७। इति व्याकरणम्॥ (यथा, भागवते। ६। २०। २१।
"माता भस्त्रा पितुः पुत्रो येन जातः स एव सः।
भरस्व पुत्रं दुष्मन्त! मावमंस्थाः शकुन्तलाम्॥")

भस्त्राका, स्त्री, भस्त्रा। इति शब्दरत्नावली॥

भस्त्री, स्त्री, (भस्यतेऽनयेति। भस्+त्रन्। गौरादित्वात् ङीष्।) भस्त्रा। इति शब्दरत्नावली॥

भस्म, [न्] क्ली, (बभस्तीति। भस् भर्त्सनदीप्त्योः+"सर्व्वधातुभ्यो मनिन्।" उणा० ४। १४४। इति मनिन्॥ दग्धकाष्ठादिविकारः।) शिवाङ्गभूषणम्। छाइ इति भाषा। यथा,—
"अस्याङ्गभूषणं भस्म विभूतिर्भूतिरस्य तु।"
इति शब्दरत्नावली॥
तद्भस्म कामदेवशरीरजम्। यथा,—
"प्रसीद सर्व्वभूतेश! भक्ता त्वच्छरणा वयम्।
इति स्म वदतां तेषाममराणां तदानलः।
ललाटचक्षुःसम्भूतो भस्माकार्षीन्मनोभवम्॥
दग्ध्वा कामं तदा वह्निर्ज्वालामालातिदीपितः।
संस्तम्भितोऽथ विधिना हरं गन्तुं शशाक न॥
महादेवोऽथ तद्भस्म मनोभवशरीरजम्।
आदाय सर्व्वगात्रेषु भूतिलेपं तदाकरोत्॥
शेषशेषाणि भस्मानि समादाय तदा हरः।
सगणोऽन्तर्दधे कालीं विहाय विधिसम्मते॥"
इति कालिकापुराणे ४१ अध्यायः॥*॥